# About Rene Descartes

# રેને દેકાર્તદર્શનમ્

## Document Information

Text title : About Rene Descartes

File name : renedekArtadarshanam.itx

Category : misc, article, pradIptakumAranandа

Location : doc_z_misc_general

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orissa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : June 27, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 27, 2022

*sanskritdocuments.org*

About Rene Descartes

# રેને દેકાર્તદર્શનમ્

લેખકઃ - નન્દપ્રદીપકુમારઃ

દેશઃ કાલઃ પરિચયશ્ચ-

પુનર્જાગરણયુગસ્ય બુદ્ધિવાદિનો મહતો દાર્શનિકસ્ય દેકાર્તમહોદયસ્ય ૧૫૯૬ખ્રીષ્ટાબ્દે માર્ચમાસસ્ય એકત્રિંશત્તમે દિવસે પ્રાન્સદેશસ્ય તુરેન નગરસ્ય લાહે ઇત્યસ્મિન્ સ્થાને આવિર્ભાવો જાતઃ । તસ્ય પિતુર્નામ જોકિમડેકાર્ટ તથા માતુશ્ચ નામ જીનીબ્રોચાર્ડ આસીત્ । જન્મનઃ કિયદ્દિનાત્ પરં હિ તસ્ય માતૃવિયોગો સંજાતઃ । સ્વાસ્થ્યગતસમસ્યા તસ્ય ચિરસહચર અભૂત્ । દેકાર્તઃ સ્વભાવેન વિનયી તથા ચરિત્રવાન્ આસીત્ । ગણિતવિદ્યાયાં તસ્ય પારદર્શિતા આકાશચુમ્બિતા । દેશભ્રમણાય તસ્ય મનસિ ભાવના તીવ્રા જાતા । પશ્ચાત્સઃ સૈન્યવિભાગે યોગદાનં કૃતવાન્ ।

કૃતયઃ-

હલાણ્ડ ઇત્યસ્મિન્ સ્થાને નિવાસમયે તેન Discours de la Methode (દાર્શનિક પદ્ધતિવિચારઃ) Meditationes de prima (પ્રાથમિકદર્શનમન્થનમ્) એવં ચ Principia philosophia (દાર્શનિકસિદ્ધાન્તઃ) ઇતિ સુપ્રસિદ્ધાઃ ત્રયો ગ્રન્થા વિલિખિતાઃ । પશ્ચાત્સઃ The passion of the soul નામકં પુસ્તકં વિરચ્ય સ્ટકહોમ (stockhome) રાજ્ઞ્યૈ પ્રાદદાત્ । અન્તે તત્ર નિમોનિયા (pneumonia) રોગાક્રાન્તઃ સન પઞ્ચતામવાપ ।

ન કેવલં દર્શનશાસ્ત્રે અપિતુ ગણિતવિદ્યાયાં જ્યોતિર્વિજ્ઞાને ચાપિ તસ્ય મહત્વપૂર્ણા પ્રતિભા આસીત્ ।

દાર્શનિકસિદ્ધાન્તઃ- (જ્ઞાનમીમાંસા)

જ્ઞાનં સાધયિતું બુદ્ધેરાવશ્યકતા બલીયસી । એતસ્માત્ કારણાત્ જ્ઞાનમીમાંસાસુ બુદ્ધિવાદોસ્ન્યતમો વરીવર્તિ । બુદ્ધિ-અનુભવયોઃ કદાચિત્ ઐકત્વં સમામનન્તિ વિદ્વાંસઃ । તૌ જ્ઞાનસ્ય સાધકત્વેન સ્વીકૃતૌ । અનુભવાત્જ્ઞાનોત્પત્તિર્દર્શનાત્ । અનુભવજન્યજ્ઞાનમયથાર્થમિતિ કેચિત્ । જ્ઞાનપ્રાપ્ત્યર્થમનુપયુક્તત્વાત્ । તન્નયે સાર્વભૌમિકત્વમનિર્વાર્ય્યત્વમિતિ દ્વિવિધં યથાર્થજ્ઞાનસ્ય લક્ષણમ્ । સાર્વભૌમિકત્વં યથાર્થજ્ઞાનસ્ય એકો ગુણઃ । અનિર્વાર્ય્યત્વમપરઃ । આદ્ય ન સાર્વકાલિકઃ દ્વિતીયઃ અપવાદરહિતઃ । દ્વયોઃ મિશ્રણેન ચત્વારવત્ ગુણદ્વયસ્ય સંયોગેન સત્યપ્રતીતિઃ, અન્યથા વ્યભિચારાશંકા । નનુ જ્ઞાનસ્ય જનની બુદ્ધિઃ તત્કથં કદાચિત્ મિથ્યાજ્ઞાનાનુભવાશંકા ઇતિ ચેદ્ સત્યં કદાચિત્ દુષ્ટબુદ્ધ્યા હિ મિથ્યાજ્ઞાનાનુભવદર્શનસમ્ભવાત્ । સત્યાનૃતયોઃ મિથુનીકૃત્ય જ્ઞાનમીમાંસાસમ્ભવાચ્ચ । અત્ર યથાર્થજ્ઞાનં નામ સાંસારિકજ્ઞાનાદ્ભિન્નમ્ સાર્વભૌમિકમનિર્વાર્યકેવલમ્ । અત્ર જ્ઞાનસ્ય વિષયો ન સંસાર અપિતુ શાશ્વતઃ સત્યઞ્ચ । બુદ્ધ્યા યથાર્થજ્ઞાનમ્ । બુદ્ધૌ બીજરૂપેણ તત્સત્ । જ્ઞાનસિદ્ધૌ બુદ્ધેઃ ક્રિયાશીલતા અવિસંવાદી । ઇયં પદ્ધતિર્નિગમનાત્મિકા । અનયા

સુપ્તબીજસ્ય અંકુરોદ્ગમો જાયતે । ગાણિતિકં જ્ઞાનં સર્વોત્કૃષ્ટતરં પરમાદર્શમિતિ દેકાર્તમહોદયાનાં વિશિષ્ટસિદ્ધાન્તઃ । ગાણિતં નામ બૌદ્ધિકમ્ । સર્વદામવિતથમ્ । ગાણિતિકચિન્તનપદ્ધત્યા સર્વાણિ અન્તર્નિહિતાનિ જ્ઞાનાનિ પરિપ્રકાશિતાનિ ભવન્તિ અન્યથા નિઃસન્દિગ્ધસર્વમાન્યસત્યસ્યાસમ્ભવાત્ । નિશ્ચિતજ્ઞાનપ્રાપ્ત્યર્થં દેકાર્તમહોદયસ્ય બુદ્ધિવાદઃ પુનર્જાગરણયુગસ્ય અયમારમ્ભ ઇતિ ન વિપ્રતિપત્તિઃ ।

સન્દેહવિધિઃ-

તત્ર આશ્ચર્યાદેવ જ્ઞાનસિદ્ધિરિતિવિશ્વવિખ્યાતગ્રીક્ દાર્શનિકાઃ પ્લેટોપાદાઃ । વિશ્વાસાદેવેતિ મધ્યયુગીયાઃ । સન્દેહાદિતિ દેકાર્તસિદ્ધાન્ત અત્ર બલવત્તરઃ । સંશયવહ્નીમુત્તીર્ય શુદ્ધસુવર્ણવત્ સત્યં પ્રતિષ્ઠિતમ્ । સત્યમુદ્ધાટયિતું સંશયસ્યાવશ્યકત્વાત્ । અન્યથા સત્યસ્વીકરણમસમ્ભવમ્ । અત્ર સંશયઃ સાધનં ન સાધ્યમ્ । તત્તુ નિશ્ચયાત્મકમિતિ । કસ્મિન્નપિ વિષયે સિદ્ધાન્તગ્રહણાત્પ્રાક્ તદ્વિષયે પૂર્વધારણાયાઃ પરિહારમવશ્યમેવ કર્તવ્યમ્ । પ્રત્યક્ષ-પરોક્ષાભ્યાં જન્યં જ્ઞાનં સન્દિગ્ધમ્ । ત્રિકાલબાધરહિતં નિઃસન્દિગ્ધં લબ્ધું તસ્મિન્ વિષયે સન્દેહ અવશ્યમેવ કરણીયઃ । વૈજ્ઞાનિકેસ્પિ સન્દેહઃ કર્તવ્યઃ । તદ્વત્ ઇન્દ્રિયેણ આગમેન વા પ્રાપ્તં જ્ઞાનં કદાચિત્ અસત્યાશ્રિતમેવ । રૂઢિ પક્ષપાતાન્ધવિશ્વાસાદિભિઃ સમન્વિતત્વાત્ । ડેકાર્તમહોદયસ્ય ઇયં પદ્ધતિઃ યદિવા સન્દેહાશ્રિતા તથાપિ સ ન સન્દેહવાદી આસીત્ । તન્નયે સત્યં સ્વતઃસિદ્ધં નિશ્ચયાત્મકઞ્ચ । તસ્ય સાર્વભૌમત્વં સહજત્વમબાધિતત્વં સર્વાદૌ સ્વીકાર્યમ્ । સાધ્યસત્યં સાધયિતું સન્દેહરૂપસ્ય સાધનસ્યાવશ્યકતા જાયતે । ઉભયોર્મધ્યે ઉપેય-ઉપાયભાવસ્તેન કલ્પિતઃ । યદ્વા સત્યં લક્ષ્યમ્ સન્દેહશ્ચ લક્ષણમ્ । યદિવા દેકાર્તમહોદયેન સન્દેહાત્મકમિન્દ્રિયજ્ઞાનં, સન્દેહાત્મકવૈજ્ઞાનિકજ્ઞાનં સ્વીકૃતં તથાપિ તેન નિઃસન્દિગ્ધં સત્યમુત્થાપયિતું સન્દેહકર્ત્તુરાત્મનઃ અસ્તિત્વં સ્પષ્ટતયા પ્રતિપાદિતમ્ ।

આત્મવિચારપ્રસંગે તેન ઉક્તં

અહં ચિન્તયામિ અહમસ્મિ (I think therefore I exist) ઇત્યત્ર અનયોઃ સંયોગાર્થં અતઃ શબ્દસ્ય પ્રયોગો યુક્તિયુક્તઃ સ્યાત્ । સુતરાં સન્દેહકર્તુરસ્તિત્વમત્ર અબાધિતવિષય ઉચ્યતે । તન્નયે આત્મા ચિન્તનશીલો મનનશીલશ્ચ । મનનમેવ આત્મનો ધર્મઃ । યદિ આત્મા નાસ્તિ તર્હિ કેન સન્દેહઃ ક્રિયતે । દેકાર્તમહોદયસ્ય સિદ્ધાન્તઃ પાશ્ચાત્યદર્શનેષુ સ્વકીયં સ્થાનં ભજતે ઇત્યત્ર નાસ્તિ વિસંવાદઃ । અલમતિવિસ્તરેણ ।

— લેખકઃ - નન્દપ્રદીપ્તકુમારઃ
શ્રીજગન્નાથ સંસ્કૃતવિશ્વવિદ્યાલયઃ પુરી

Written by Dr. Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

*About Rene Descartes*
pdf was typeset on June 27, 2022

Please send corrections to *sanskrit@cheerful.com*